1532

M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 852

Title: Ramakrishna Kavya

852

852

रामकृष्ण काव्यम्

:	Ramakrishna Kavya	: Title
:	:	: Author
:	:	: Editor
:	Saka 1682	: Year, Vols.
:	:	: Publisher
852 :	:	: Remarks

852

[illegible]

श्रीग[illegible]धिपतये[illegible] [illegible]नंदन[illegible]दारदांशाबदन्नक्षमनोरमां सुगुणकृन्नाना
धिराजात्मजः यद्ग्रंथ[illegible] [illegible] हुथा वार[illegible]र्गामगात्सोहंसूर्यकविर्विलोमवच्चनंकार्यंकरोम्य
द्भुतं १ छंदः पूर्णमनुक्रमक्रमविरोधोसाकांक्षतातसंदेह्यारंभाच्चरितक्रमौप्युतद्विधेर्विघ्नत्रयं दुर्गमं।
एवंसंततिमन्मतिः किमपिच प्रागल्भ्यमालंबने तत्सर्वं गुणिनः क्षमंतु यदहो यूयं क्षमज्ञाः स्वयं २
कदाचिदपि संतरेत्कृतिपरो नरो नीरधिं कथंचिदपि धावति प्रसरधामधाराध्वनि। सतेप्यलिविशारदा
नुग्रहं विलोमकविताकृतौ स्फुकविधीरधीरा भवेत्। ३ भागीरथीरामकथालिरंभ्याकालिंदिकारुष्ठा
कथामनोज्ञा सुरस्वती सूर्यकविस्तृतीयारन्नातु प्रयागेत्रमतिः कवीनां ४ समाक्षरां घ्रिर्विषमाक्षरा
घ्रिर्द्विधाभवेद्यस्तकविप्रसीमा समानभिन्नार्थतयाद्विधाद्याभिन्नाक्षराभाविद्वितीया ५ अथकवि
त्वपरिभाषा अध्याहारोयत्नद्वोर्वाविधेयः पादाद्यंतेवाविसर्गोविसर्गः कुत्राप्यूह्यालक्षणाव्यंजनावा
विद्याद्देरांचित्रकाव्यानुपूर्वी ६ नैकाक्षरस्यनिर्धोक्तिर्नाप्रसिद्धाभिधानकं नेच्वव्याकरणात्तुक्ति
स्संद्राक्षायकौत्रकेवलं ७ अथयोः कथाप्रसंगस्तावेवेष्टदेवताहेनप्रणमति ॥ ॥ हेलवेरति। १

तंभूसुतामुक्तिं वंदे। भूसुतायाः मुक्तिर्यस्मात्तं तथा रावणरक्षितायाः सीतायाः मुक्तिः मोक्षणं यस्मा
त्तं रांघवं वंदे। नमस्करोमीत्यर्थः ॥ कथंभूतं। उदारहासं। उदारः हासोयस्य तं तथोक्तं। उद्योगनिमि
त्तेषु सर्वानर्थेष्वपि अनुद्विग्न इत्यर्थः। पुनः किंभूतं। भव्यभवं। भव्यः पवित्रः भवो अवतारो यस्य स
तथोक्तः। अथ तंकं। यतो दयाश्रीश्च बभूव। दयाभूतदया। श्रीः शोभा तयोर्निदानं इत्यर्थः १

तंभूसुतामुक्तिमुदारहासं वंदे यतो भव्यभवं दयाश्रीः। श्रीयादवं भव्यभतो
यदेवं संहारदामुक्तिमुतासुभूतं १

श्रीयादवं वंदे। किंभूतं। भव्यभतो यद्देवं। भव्या उत्तमा भा दीप्तिर्यस्य असौ सूर्यः तथा तोयशब्देन
चंद्रः। जलात्मकत्वात्। तयोर्द्योतना देवः। सूर्याचंद्रमसोरपि प्रकाशकत्वादित्यर्थः। तदुक्तं। यदादित्यग
तं तेजो जगद्भासयतेखिलं। यच्चंद्रमसि [illegible]त्तेजो विद्धि मामकमिति। किंभूतं यादवं। संहार
दामुक्तिं संहारं ददातीति सं[illegible] [illegible] जेवनश्यति इह [illegible] [illegible]तीति तथा विधा पूतना तस्याः मुक्तिर्मोक्षोय

स्मात्सतमापुनः कथंभूतः उत्तमसु[illegible] दोथवा [illegible] णरूपेणावस्थितमित्यर्थः। अथवा प्राण
नंजीवनंतद्रूपंचैतन्यस्वरूपं। तदुक्तं। अहमात्मा गुडाकेश सर्वभूताशयस्थित इत्यादि। पूतनायै मुक्तिं
दातुं अंतर्यामित्वेन स्वयमेव तत्प्रेरकोऽभूदित्यर्थः १

ननु देवताया अपि रामादेः कथमंतर्यामित्वमित्याशंक्य कल्पापेक्षया कृष्णानन्दामस्याथाह चिरमि
ति। विरिंचिर्ब्रह्मा परार्धावसानं यावत् सर्वभूतापेक्षया चिरं तिष्ठतीति। प्रथमं। परंतु आब्रह्मभुव
नाल्लोकाः पुनरावर्तिनः इति श्रवणात् चिरं विरिंचिरिति न ज्ञायते। तस्यायुषः परिमितत्वात्। अथ सा
कारतास्य सतारकासा। सेति तच्छब्देन रामस्य साकारतातारकेण सह वर्तमाना सतारका स्या
सती चासौ सतारका च सस्य सतारका सस्य मवाच्यं। विज्ञानमयं तारकं ब्रह्म तद्रूपमित्यर्थः २

चिरंविरिंचिर्नचिरंविरिंचिः साकारतासस्य सतारकासा साकारतासस्य सतारकासा
चिरंविरिंचिर्नचिरंविरिंचिः २

श्रीकृष्णापक्षे तु साकारतासस्य सतारका या कृष्णरूपिणी साकारता सा सती सर्वदैव वर्तमानानि २

त्यदेत्यर्थः। किंभूता असतारका तारकाभिः सह वर्तमानं सतारकं व्योम तन्न विद्यते यस्यां सा असतारका
व्योमापि यस्यां लीयते। इतः परं नित्यत्वं किं वर्णनीयं इत्यर्थः चिरं चिरं चिरित्यादि पूर्ववत् २
अथ रामकृष्णाभ्यां यां मायां धनत्रयं साकारता स्वीकृता तस्याः स्वरूपं समाक्षरतया स्थोघतया आह
तामसीति। असत्सीमता तामसीति। असती शुक्तिकारजतवदसत्ये प्रपंचे सत्सीमता सत्त्वमापादि
तिल अथास्यात्। असत्यत्वं कार्यवज्ञादनुभूयत इत्याह। माययेति यया कृत्वा महालक्ष्मीः अयमानवि
द्यते। यमो नियमो यस्याः सा तथा। योग्येवा कुत्रस्थानत्वं क्रियत्कालं वेति क्षणभंगुरया लक्ष्म्या नियमो
नास्ति। उक्तरक्षणेबाधदर्शनात् भ्रमरूपता द्रष्टव्येत्यर्थः ३

तामसीसुसतिसस्युसीमता माययाक्षमसमक्षमायया॥ माययाक्षमसमक्षमायया तामसीसुसति
सस्युसीमता ३ ६२ ६२ ६२ ६२ ६२ ६२

किंभूतया मायया अक्षमसमक्षया नक्षममक्षमं अक्षमः समक्षा यस्याः सा तस्याः मायायाः स्वरूपे वि
चार्यमाणे समक्षत्वं न प्राप्नोमि। प्रेक्ष्यमाणे व नश्यति इत् [illegible] त्वात्। यतः परमात्मा ज्ञानरूपः मायायां ज्ञा

ननूपासाकथंब्रह्मसमक्षतांयाति। यतोज्ञानस्यद्यानुकमित्यर्थः। एवमुभयथापिसमंतदितिसमाक्ष
रमेदद्वयं ३ श्रीकृष्णाकमळाकांत श्रीरामः शरणंममेतिपरमो मंत्रोयमष्टाक्षरः॥ छ छ
एवमविद्याःस्वरूपंनिरूप्येदानींविद्यास्वरूपंविषमाक्षरयाशाळिनाहकेति। अत्रविविद्यासंसारता
पघ्नीकास्तीतिविवार्यमाणे। त्रेधाविद्यास्ति। त्रिप्रकारात्रेधा। ऋग्यजुःसामात्मिक ननुतर्हिकर्मकांडवि
द्योपदेश्यंविद्यात्वयस्तद्देदोभयंसदेतिउक्तवादिसाशंक्याह। किंभूत त्रेधाविद्यातारकाद्या। तारकं
परब्रह्मश्रीरामाख्यंआद्यं श्रेष्ठत्वात्तन्निरूपिणीयत्वेनप्रा हंयस्याःसातथाउपनिषद्भागात्मिकेत्यर्थः।
पुनःकिंभूताविगतंपापंअज्ञानंयस्याःसातथा। अथतस्याःपापोपशमनहेतुत्वंतमाह। नोकृष्णारमिति।
निवासोयस्मिन्नास्तिसनिवासःशीतळच्छायाद्युपस्कृतंगृहंतस्मिंनुष्णाकसंसंतापभयंनास्तीतित
द्वदेदार्थकारिशीतळनंत्रिविधतापोन्मूळनमित्यर्थः ४

कांतावस्त्रीतारकाद्याविपापात्रेधाविद्यानोष्णाकसंनिवासे सेवानित्यंकृष्णानो
द्याविधात्रेपापाविद्याकारताघ्नीपताका ४ छ छ छ २

कृष्णपक्षेतु। अथकृष्णाभक्तिसहकृतैववद्याअज्ञाननाशकत्रीत्याह विद्यात्रेतुसत्रेर्जुनायत्रझणेवाकृ
ष्णानोद्यानित्यंसेवापापाविद्याकारताघ्नीभवति। श्रीकृष्णेननोद्याप्रेर्यमाणनित्यंसेवा अनन्यभक्तिः
सापापंदुःखंतन्मूळमविद्याकारज्ञानंतदुभयमपिनाशयति। तदुक्तंगीतासु भक्त्यात्वनन्ययाशक्य
अहमेवंविधोर्जुन। ज्ञातुंद्रष्टुंचतत्त्वेनप्रवेष्टुंचपरंतपेति। अथपताकेवपताकायथागरुडलांछनांकिता
कृष्णापताकादृष्टमात्रैवकृष्णआगतइतिस्वरूपानुसंधानेनसाक्षात्कारंव्यनक्ति। तद्वदनन्यभक्तिरि
त्यर्थः ४ इयंमायापरात्मसमक्षंस्थातुंनशक्नोतीतिस्वरूपानुसंधानेनमायातिरस्कारइत्युक्तं। तत्रात्म
ज्ञानेमहानायासःश्रीरामसेवयानुविद्याप्राप्तिः तयोस्ताक्काळएवज्ञाननिरासइतिविषमाक्षरयेंद्रवज्र
याह। श्रीरामइति। इवासर्वत्रास्पुमान्धीरःयेनानिशंश्रीरामतोमध्यमतोदिश्रीरामतोनिमितभूतान्मध्य
मध्येअवभासमानंअपवर्गाख्यंअतोदिनाशितंसएवधीरइत्यर्थः। किंभूतात्श्रीरामतःवश्यवतीवरात्व
रांनेतुंसमर्थंवश्यत्वंतद्वतीजानकी। तस्यावरात्। भर्तुरित्यर्थः ५ छ छ छ छ छ

श्रीरामतोमध्यमतोदियेनधीरोनिशंवश्यवतीवराद्वा द्वरावतीवश्यवशां
निरोधीनयेदितोमध्यमितोमराश्रीः ५ छ छ छ छ छ

कृष्णपक्षेतु निरोधीपुमान् मध्यंविदाचिद्धंयस्वरूपंममइतः प्रपंचात् द्वारावतीवंश्यवशंनयेत् वापुनिरोधी
वापुमान् द्वारावसाः वश्यतत्रासक्तः कृष्णः तत्रवशंनयेत् योगेनवैराग्येनवाचित्तंनिरुध्यश्रीकृष्णएववशं
नयेदित्यर्थः तेनकिंभवतीत्याह अतःअस्मात्उपायात्श्रीः लक्ष्मीः मोक्षलक्ष्मीः अमरास्थिराभवति अ
न्यथानिरोधवानपिविघ्नेनाभिभूयतइत्यर्थः उक्तंच तथानतेमाधवतावकाःक्वचिन्नश्यंतिमार्गात्क
तमानसास्त्वयीति ५ श्रीराम अथकथाप्रसंगः तत्रविश्वामित्रःस्वयज्ञरक्षणार्थंरामंयाचितुंदश
रथंप्रसगात् इतिविषमाक्षरतयाश्लोकमाह द्वितनयस्वंकौशिकेददात् रक्षेषुसर्वभूतेषुव्रतमभी
प्सितपूरणंयस्यसतथादशरथःसः द्वयोस्तनयोःद्वितनयात् तदेवस्वंधनंतदेवकौशिकेविश्वामित्रेअद
दात् अदत्तवान्ननुप्राणादपिप्रियद्वित्समाहारो तमंपुत्रास्वंधनंविश्वामित्रार्थेकेननिबंधेनदत्तमित्या
ह किंभूतेकौशिकेत्रितपसित्रिप्रकारंत्रिगुणासकंप्रसादतोसमर्थतपोयस्यासोत्रितपः तस्मिन्त्रित
पि किंभूतंद्वितनयस्वं आतुरं पितुर्वियोगादमित्यर्थः ६ छ छ छ छ छ छ
कौशिकेत्रितपसिरक्षरव्रतीयोददाद्वितनयस्वमातुरं रत्नुमास्वयनतद्दितादयोतीव्ररक्षसिपतत्रिकेशिके ६ ४
कृष्णपक्षेतु श्रीशुकःपरीक्षितंप्रतिवक्ष्यमाणंकृष्णकथोद्देशमनुवदति भोआस्वयन आसमंता

त्सर्वत्र अयनंगतिः परमार्थेगतिर्यस्यसतथातथाविधपरीक्षितः तद्दत्कृष्णांतीव्ररक्षसिपूतनाख्येतथाप
तत्रिकेशिकौपतत्रिपक्षीबकासुरःकेशीहयरूपोदैत्यःतयोःकुः पार्थिवंशरीरंतस्मिन्वादयोस्ति आसमं
तात्दयाकृपायस्यसतथापूतनाबककेशिशरीराणिकृपयैवतारयदित्यर्थः किंकर्तुंरंतुंक्रीडितुंक्रीडास्थ
लमित्यर्थः ६ छ छ छ अथविश्वामित्रेणरामंप्रस्थितमाकर्ण्यराक्षसास्त्राटकांप्रेषयामासुरित्या
ह हेलंबाधरेसत्वक्षरंयाहि अधरश्च ऊरुश्च अधरोरू लंबौअधरोरूयस्याः सातथातस्याः संबोधनं।
किंभूते त्रयबैलंबनासेत्रयैलंबानासानासिकायस्याः सातथाविधेरक्षरंनाशयोग्यंमानुषदेहंरामंप्रतिया
हि आदरेद्विरुक्तिः किंभूताबंआगतज्ञा आगताप्राप्ताज्ञारावणानुज्ञायया सातथा ७ छ छ छ छ

लंबाधरोरुत्रयलंबनासेत्वंयाहियाहिक्षरमागताज्ञा ज्ञातागमारक्षहि
याहियमंसेनाबलंयत्रतरोधनालं ७ छ छ छ छ छ छ

कृष्णपक्षेतु श्रीकृष्णंगोकुलस्थितमाकर्ण्यकंसः पूतनामाज्ञापयति इतिएवंतत्रयाहिबलंपुरुषार्थेरक्ष
तुकुत्रेत्याह तत्रसेनाबालंकुरोध इनेनस्वामिनानंदेनसहवर्तमानासेनायशोदाबालंकृष्णमास्कुरोधआ
च्छाद्यस्थितवतीत्यर्थः कुतएवंतावंलभविश्वासैक्ततवतीत्याह ह्रीतिनिश्चयेनज्ञातागमाज्ञातःआ

गमोययासाकापिबाधातार्थंआयास्यतीतिसंभावयंतीत्यर्थः ७ छ छ छ अथतारकासमंभर्यनरवी
समागताइत्याह लंकेति तयासाकंनियगमाभूत् लंकायांमयनंगतिर्यस्याः साशूर्पनखीतयावारक
यासाकंनियगमाभूत् निसंगदर्शतीतिनिसगमापर्यरंतीसस्यभूदित्यर्थः किंभूतोअनुन्नयमानुका
ज्ञानानुन्नः प्रेरितोअनुन्नःस्वतः वृत्तः एवंविधोयोयमः कृतांतः तद्वदनुकारोयस्याःसानिःकृपेत्यर्थः
किंभूताधवाकाशाधवविषयिणीआशायस्याःसातथासरामंभर्तारमपेक्षमाणा ८ छ छ छ

लंकायनानिसगमाधवाशासाकंतयानुन्नयमानुकारा राकानुमा
यन्नानुयातकंसाशावाधमागसानियातकालं ८ छ छ छ छ

कृष्णपक्षेतु शावाधमागसकालन्निनायशचिक्रियाः शावाः क्रव्यादाः तेष्वेवाधमाबालघातिनीपूतना
आगसगोकुलंप्राधकालंस्वग्रासंकृष्णंनिनायशासवती ननुराक्षसीगोकुलांतर्गतानत्रसैः किंपूर्वनि
षेधइत्याह यतूयतःराकानुमानकापूर्णिमातयानुमीयतेसातथाप्रथमतोराकावदतिसुंदरंरूपंधेत
वतीतदाक्षिण्येनकेनापिग्रहातगमनेननिषिध्धानन्विलितिनिर्धारणे।यातकंसा।यातोंतरितःकंसो ५
यस्याः सातथापुनःकंसेसनहंताग्रस्तासतिविपन्नेत्यर्थः ८ छ छ छ छ छ छ छ॥

अथविश्वामित्रस्ययागव्यवस्थामनुष्टुभाह गाधियाजोविश्वामित्रः तस्याध्वरोयागःतत्रवैरंयेषांतेखर
दूषणादयःतेअतीताःसंतोदेहादिप्रपंचमतिक्रम्यगताइत्यर्थः किंभूताःरक्षसामताःरक्षसारावणेन
कंसामताःसमताःतत्सन्मानेनप्रसिध्धाः ९ छ कृष्णपक्षेतु पूतनावधमाकर्ण्यकंसेनअन्येबकत
णावर्तादयःप्रेषिताइत्यर्थः तामससाक्षरतातीतेकृष्णेसतियेरावणप्रेषितादैत्यास्तेअध्वजाधिगाःआ
सन्तामसेनअहंकारेणआसमंतात्उत्पन्नायाक्षरताअपंचात्मिकाशतातततोथतीतेपरब्रह्मरूपेकृ

गाधिजाध्वरवैरायेतेतीतारक्षसामताः तामसाक्षसातीतेयेरावैरध्वजाधिगा ९

ष्णेसतियेदैत्याःवैःकंसनिर्दिष्टशब्दैः आगताःतेअध्वजाधिगागोकुलमार्गयानेजातायआधिःमान
सीव्यथातांगताःतःप्राप्ताः अहोगोकुलंगत्वाप्रपंचातीतेकृष्णेअस्माभिःकिंकर्तव्यंपूतनावत्कर्तव्य
मेवेतिपर्याकुलचित्ताआसन्नित्यर्थः ९ छ छ छ छ छ छ
कृष्णकृष्णेतिकृष्णेतियोमांस्मरतिनित्यशः जलंभित्वायथापद्मछइति श्रीरामजयरामजयराम
श्रीरामजयरामजयजयराम श्रीकृष्णश्री श्रीकृष्णजयकृष्णइति श्रीरामश्रीरामश्रीकृष्ण छ

अथमुनिभिः केवलंरामार्पणत्वेनकृतस्ययागस्यप्रशंसामाह देवेरघुनाथेदयाकृपाप्रीतिःस्तावतूदे
वसंभवतीतियावत् यागेअवासनायागेक्रियमाणेअवासस्वर्गादिभोगप्राप्तोइच्छारहितंतस्मात्पू
कराहित्येनयोयागःसनामप्रीतयेभवतीत्यर्थः १० छ छ छ

तावदेवदयादेवेयागेयावदवासना नास्वादवयागेयावेगेयादवदेवता १०

कृष्णपक्षेतु कृष्णपरब्रह्मरूपतामवधारयंतोदैसाः पुनःपरामर्शंवक्रूरित्याह यादवदेवताकृष्णमूर्ति
वेदगेयावेदेउपनिषद्भागेगातुंनिरूपयितुंयोग्यानतुसासाक्षात्कर्तुं अथान्येननिरूपयितुंनशक्यते
इत्याह नास्ववादीति असुसंबंधिआसवंप्राणात्मकंशरीरं अवेसुपसर्गः अवलक्षणद्योतकः त
थाचावलक्षणान्मनुष्यदेहात्सकाशान्ननिरूपयितुंशक्यते एवंप्रथमंतस्यनिरूपणासंभवेतस्यदर्श
नमस्माभिरसंभावितमित्यर्थः १०
श्रीकृष्ण श्रीरामजयरामजयजयराम श्रीकृष्णजयकृष्णजयजयंकृष्णश्रीरामश्रीकृष्णइति छ

अथस्वयंवरप्रदर्शनमयात्तकौशिकेनसहजनकगृहंप्रतिगतेरामस्तत्रकिंकृतवानित्याह अथेभ्यणुतअ
नेनरामेणसभासुशिलाशैः सहचापंभग्नंसभासुराजास्थिताशिलावतूदृढाजानक्याविषयिणीआशी
येषांतेषांशिलाशाराजानः तैःसहचापंभग्नंजानोपिभग्नमनोरथाःकृताइत्यर्थः नहांस्वरस्यभावेन
किंतुकीनाशतानुधरूषा कीनाशस्यभावःकीनाशतायमरूपतातयारुअभिनविद्वेशरावणौःतस्यरूषा
कोपेनप्राचीनवैरानुबंधानिमित्तेन अथवापूर्वंधनुरुत्थातुंप्रवृत्तोरावणोधनुषाधःपतितःपरंतुनहतइ
तिरूषाकोपेनवेत्यर्थः ११ छ छ छ छ छ

सभास्वयेभग्नमनेनचापंकीनाशतानुधरूषाशिलाशैः शैलाशिशारुधनुताशना
कीपंचाननेमग्नभयेस्वभासः ११ छ छ छ

कृष्णपक्षेतु गोवर्धनोद्धरणेइंद्रोलाघवंप्राप्तइत्याह पंचाननेनरसिंहेकृष्णेस्वभासःस्वप्रतापान्मग्नंभग्नं
मयंनिःशंकतयागंकारयितुंप्रवृत्तेसतिशैलाशिशारुधनतासनाकीवृष्टःशैलस्यगोवर्धनस्यआशि
षोअभीष्टपूरणेनतुष्टातएवनुताभग्नाआशाहविर्ग्रहणोद्यायस्यतथाविधोनाकीस्वर्गाधिपः
इंद्रोभूदित्यर्थः ११ श्रीराम छ जयराम छ जयजय छ श्रीरामचंद्र छ जानकी छ जीवनरा छ म

अथस्वयंवरार्थमागतानांराज्ञांअज्ञानंवर्णयन्नाह यांअक्षरभाअसीतांलोकोनवेदअक्षरंनविच्युतं
भामसौभाग्यंयस्याःसाअक्षरभाम्नीवासौसीतास्वतांनजानातीत्यर्थः अविवादेविष्णुजितेकांतारकोवि
ष्णुनारामचंद्रेणजितंविष्णुजित्तंतस्मिन्विष्णुजितेअविवादेसर्वसंमतेसलिकारकांतारकासंप्राप्नोतिता
रकासंयोगस्तुचंद्रेणविनान्येननभवति अकुलेनरामचंद्रेणसहसीताएवतारकासंप्राप्तुमर्हतिनान्ये
नेत्यर्थः १२

नवेद्यामक्षरभामसीतांकांतारकाविष्णुजितेविवादे देवावितोविष्णुवि
कारताकांतांसीमभारक्षमयादवेन १२

श्रीकृष्णपक्षेतुगोकुलोपरिक्षुब्धस्येंद्रस्यकिंचललीसाह सीमभारक्षमयादवेन देवावितोविष्णुविकारता
कांतांनवेत्सीत्यध्याहारः सीम्नोभारःसीमागिरिमर्यादातस्यभारक्षमश्चासौयादवश्चतेनशत्रुत्वादेवास ७
र्जन्यात्अविलेरक्षितेगोकुलेजिष्णोरिंद्रस्यशिलापाषाणादिविकारताकाननकार्यीत्यर्थः १२ श्रीराम

अथधनुर्भंगेसतिजानक्याराममोहतद्वतिअनुष्टुभाह तीव्रागावःकिरणायस्यएवंविधस्यतीव्रगोःसूर्य
स्यअन्वयंत्रायंतेतेअन्वयत्राःसूर्यवंशाभिमानरक्षकादिलीपादयस्तेषुआर्यःश्रेष्ठःसूर्यवंशालंकारणौं
रामवैदेहीमनसोमतः जानक्यामनसापूर्वकंवृत्तः नतुधनुःपणबंधनेनेत्यर्थः १३

तीव्रगोरन्वयत्रार्योवैदेहीमनसामतः तमसानमहीदेवैर्योत्रायन्वरगोव्रती १३

कृष्णपक्षेतु ब्रह्मसत्रप्रतिगतःश्रीकृष्णःअसौब्राह्मणैर्नमानितइत्याह अत्रअयन्वरगोव्रती अत्रब्रह्मस
त्रेअयन्प्राप्तः वराभाव्यशालिन्योगावएवव्रतंपरिपाल्यत्वेनोपरिस्थितंयस्यअसौवरगोव्रतीकृष्णःत
मसःअज्ञानात्महीदेवैःसत्रस्थैःब्राह्मणैःनमानितइत्यध्याहारः १३
श्रीरामजयरामजयजयराम श्रीकृष्णजयकृष्णजयजयकृष्णइतिश्रीराजश्रीरामश्रीकृष्णइति छ

अथजानक्याःपारमार्थिकंरूपंदर्शयन्नाह साधारामा अवतताार आधारेणविष्णुनासहमालक्ष्मीः अव
तारंचक्रे साकायापद्मसदनंवेदापद्ममेवसदनंअधिवासस्थळंवेदज्ञानवती अनेनलक्ष्म्याःपूर्णावता छ
रइतिसूचितं अथवापद्मंविष्णोश्चरणकमळवदेवसदनंतदेवविश्रामस्थळंजानकी १४

वेदयापद्मसदनंसाधारावततारमा भारतातवराधासा
नंदसद्मपयादवे १४

अथकापिगोपिकानंदंप्रतिराधायाःपैश्वर्यंवदति भोसद्मपगृहाधीशसातवराधासेतितच्छब्देन
विदितवृत्तांतेसूचितं तथायादवेकळेमारतामदनरूपाइसेवंसमावारोस्तिअनेनकस्यवयःसं ८
धिर्वर्णितोभवति १४ श्रीरामजयरामजयजयरामश्रीकृष्णजयंकृष्णजयजयकृष्णइतिरामकृ

अथपरशुरामोरामंप्रकोधोवदति भोक्षत्रनश्वमेपिनाकेहंनगोसियद्यपित्वयाजीर्णधनुर्भंगंनीतंतथापि
मदानीतेधनुषिनगस्यपर्वतवरस्यउपसमीपेगच्छतीतिनगोपगःपाषाणःतत्तुल्योधनुषोगुरुत्वेनिश्चे
ष्टोभवतीत्यर्थः एवमेतादृशेत्वयिजनकेनयत्कन्यादानंकृतंतदयुक्तमित्याह धर्मधनेनकन्यालक्षणेन
अजनंयद्दानंअनायःजनोदानपात्रं एवंउदानपात्रेत्वयियद्दानंकृतंसअनायः नयोनीतिःतत्संबंधी
नायःननायःअनायःअनीतिरित्यर्थः १६

नगोपगोसिक्षत्रमेपिनाकेनायोजनंधर्मधनेनदानं नंदाननेधर्मधनंजयेनाकेनापिमेरक्षसिगोपगोनः १६

कृष्णापक्षेतु दैसवधंदृष्ट्वानंदःकृष्णंस्तौति भोकृष्णत्वंनंदाननेनासिनंदएवआननंमुख्योयस्मिंस्तंनंदा
ननंगोकुळंतस्मिन्गोकुळेनपुरुषःपरमात्मासिवात्सल्यकत्वात् गोपगःगोपालैःसहगच्छतीतिगोपगःएवंभू
तोपिकेनापिप्रकारेणमेइतिमांकर्मणिषष्ठी रक्षसित्रातिपाळयसीत्यर्थः अतएवधर्मधनंजन्मांत ९
रीयधर्मैरार्जितंधर्मधनंतथानःअस्माकंजयोपित्वमेवासि १६ श्रीरामजयरामजयजयरामइति

अथपरशुरामसमागमेपिरामोनाहृतशक्तिरित्याह नृपस्य उत्सवः शैवतोद्धनने आरोधीत्याह नृपस्य दशर
थस्य उत्सवो यस्मात् सः नृपोत्सवो रामः शैवतः शिवस्य पक्षपाती शैवः परशुरामः तस्मात् शैवतः हननेपु
ष्यकालविर्भावेपि अकुंठितशक्तिरासीदित्यर्थः त्रिमानस्थितेषु देवेषु यस्य स त्रि इत्यर्थः १५ छ छ

शैवतो हननेरोधीयोदेवेषुनृपोत्सवः
वत्सपोनक्षुवेदेयोधीरोनेनहतोवशी १५

कृष्णपक्षेतु अभक्तहस्य स्वरूपं धेनुकवंधन्वाहयोर्वेदेस्ति वेदेप्रतिपादितोस्ति सनक्षुवत्सपोभूत् अने
नवत्सपेन कृष्णेनधीरो धेनुकः अवशैः असाध्यैः तज्जातीयैरन्यैः सह हतो अमारीदित्यर्थः १५ छ छ

अथरामेराज्याधिकारिणंदृष्ट्वाकैकेयीसापत्न्यभावंअदर्शयदित्याह अमस्वनसुंदराक्षीपदायदामलता
आमःस्वनोयस्याःसाअमस्वना अपरिपक्वस्वनानूतथाविधान सुंदराक्षीकैकेयीपदायराज्यप्रसयेदाम
निर्बंधप्रकारणंविस्तारयामास पुत्रायराज्यायदेयमितिदशरथायानिर्बंधंचकारेत्यर्थः आमस्वनेतिपदेन
इदंमातृकसंनेतिसूचितं अथकंदामततानेत्याह कुवाइमेनरुवादीष्याइमेरामादयःपदयोग्यानभवंती
ति अथतस्याःकिलौकिकभयंनासीत्याह प्रमदेति प्रकृष्टोमदोवीर्यंयस्याःसातथा १७ श्रीरामजयराम

लतानदानप्रमदापदायनेमेस्वामस्वनसुंदराक्षी क्षीरादसुंनस्वमन्वासमेनेयदायदामप्रनदाननताल: १७

अथकृष्णपक्षेतु कदाचिदपिकृष्णेनदधिभांडेभग्नेदुग्धनाशेजातेसतियशोदायाविश्रामोभूदित्याह
प्रमदायशोदाक्षीरात्सकाशादसुंप्राणमयिस्वंस्वकीयंनमेने यथाक्षीरेममतातथाप्राणेभूदित्यर्थः अ
यकृष्णबंधनार्थंयद्दामआपप्रापतदाचास्कार्यक्षमंनभवतीतिमेने अतः दायापूरणहेतोःनतान
क्वापरिश्रांताभूदित्यर्थः १७ श्रीरामजयरामजयजयरामश्रीकृष्णजयकृष्णजयजयकृष्णश्रीराम

अथवनवासार्थंरामेप्रस्थितेसतिअहल्योद्धारणप्रसंगमाह मत्तसूत्रामातांइतः प्राप्तः मत्तकामोप
हितःसूत्रामाइंद्रः तांप्रसिद्धांअहल्यांप्रलिगतः तथाएषःसूत्रामशापातूविगागतांइतः प्राप्तः गोतमकृ
तात्शापात्तूविगानतांसहस्त्रभगत्वादिलक्षणंप्राप्तः १८ श्रीरामजयरामजयजयराम श्रीकृष्ण इति

तामितोमत्तसूत्रामाशापात्दोषविगानतां तानंगातविषदेपाशामात्रासूचमलोमिता १८

कृष्णपक्षेतु पूर्वश्लोके कृष्णयशोदयादाम्नाबध्य इतिसूचितंतत्रयमलार्जुनोन्मूळनप्रसंगमाह ता
मवस्थामनुभूयंनगाविपदेकृष्णेसतियशोदामात्रास्कअपाशात्तथाउत्तमभतःमितामभूत् नगच्छतनगोस्थ
वनेवृक्षौयमलार्जुनौताभ्यांअविषंअमतंमोक्षः तत्रदेकृष्णेनसतियशोदामात्रासंदधिदुग्धादिविषमे १०
षुअपाशौअनिबंधासतिउत्तमतःअलौकिककर्मकृतः कृष्णात्भीतासमर्यादाभूत् १८ श्रीरामच

अथशूर्पनखायाः प्राप्तायानासाकृंतनंकृतमितिशालिनीछंदसाआह शूर्पनखानावतूनासावद्याअपत्रापा
स्तिनासांनासिकातस्याअवद्यंविगानंछेदलक्षणंतेनअपत्रपालिनिर्लज्जास्तिलक्ष्मणस्त्तआज्ञाविनोदीआ
ज्ञयाश्रीरामाज्ञयाविनोदोयस्तीस्यातिविनोदी तथाधीरोदांतःश्रीरामस्तनुसाशूर्पनखीकृतयास्मसउपा
लंभेनविगीसअकीर्तिव्यापनेनसस्मितोभूत् १९

नासावद्यापत्रपाज्ञाविनोदीधीरोनुसासस्मितोद्याविगीसा
सागीविद्यातोस्मिससानुरोधीदीनोविज्ञापात्रपद्यावसाना १९

कृष्णपक्षेतु नारदशापान्मोचिताभ्यांकुबेरपुत्राभ्यांस्तुतःश्रीकृष्णःस्तोप्रतिस्वरूपमाह अहंविद्यातःसागी
सानप्रदोस्मितथासमानुरोधीसंसंपरत्रहतत्रानुरोधीप्यासक्तिर्यस्यसतथालोकस्तुदीनःविषयेषुस्म
क्तोस्तिअविज्ञा अविद्यातुपात्रपद्यावसानापात्रंज्ञानविषकंतस्यपद्यापधानिर्ज्ञानमार्गनिष्ठतंतेने
वअवसानंनाशोयस्याः तथाएवंसतिशापनिर्मुक्तैःक्रियतीसर्गः १९ श्रीरामजयरामजयजयराम

अथयंस्ववरीवनेस्यपरिग्रहेरामेकृताधिवासेसतिकिंचिदपूर्वंजातमित्याह भिक्षुःसंभावितमगारमगात् भि
क्षुरूपधरोरावणःसंभावितंपूर्वंनिर्मायकत्वेनज्ञातंआगारंपंचवटीस्थकंअगात् ततःस्वनद्याजवेनशायाता
धिःसन् आप सुतरामनघःपापएवंविधःअजवंशःतस्मिन् जातोरावणःपातोगतःआधिश्चितायस्यजा
नकींदृष्ट्वानिश्चितःआपजानकींत्रायनिःपापवंशोपन्नोपिएतादृशंनिद्यंकृतोदिसाश्चर्यत्वादितिसूचितं २०

संभावितंभिक्षुरगादगारंयाताधिरापस्वनद्याजवेनः त्रावंजघानस्वपराधितायारंगादगारंक्षुभितंविभासं २०

श्रीकृष्णपक्षेतु पूर्वोपक्रांतकृष्णःरंगात् रंगस्थकंसात्सकाशात् त्रावंरक्षितयापूर्वमेवगतप्राणंकंसंजघान किं
भूतंअगारंक्षुभितंअगारःराजकीयपरिवारःतस्मिन् क्षुभितंसक्रोधंएवंवाणरघातीकृष्णःकथंनिः
सार्यतइति किंभूतविभासंविद्धायंसद्योमरुत्चिन्हयुतंअथकस्मात्पोजघानेत्याह स्वशप्तितायाः ११
अपराधिनोभावःसुअपराधितासुतरांहंतव्यादिसर्थः २० श्रीरामजयरामजयरामजयजयरामइति

अथमगयापरांवृत्तस्यरामस्यजानकीममयतोनिर्वेदमाह मामागतंतयाजानक्यायोतिदिकू मषावगातंनि
क्षांतंअथसास्वतोनगतबलात्कारेणनीताभविष्यतीत्याह किंभूतयातयाअतितारस्वनयाउच्चैराक्रोश
माणयापि एवंतस्यांगतायांपिनाकेलोकापवादाद्दितयंअज्ञानेनमगपृष्ठतोधावनंस्त्रीहानिश्चेतिअप
वादद्वितयंयातमित्यर्थः २१ श्रीरामजयराम कृष्णपक्षेतु कंसहननात्पूर्वंरंगमाह यंकंसंकेनापिप्रकारे

तयातितारस्वनयागतंमेलोकोपवादद्वितयंपिनाके केनापियंतद्विदवापलोकोमेतंगयानस्वरतातियाल २१

णकालअनायाकालःकृतांतोयमःकृष्णःननुपरब्रह्मस्वरूपस्यकृष्णस्यद्वेषःकथमित्यतआह किंभूतका
लः ~~मातंगनस्वरतातिया~~ तद्वित् तदुपस्थितकंसहननंवेत्तीतितद्वित् अथकश्चनप्रकारस्तमाह किंभूतः
कालःमातंगनस्वरतातियातःमातंगःकुवलयापीडःतस्ययानंधावनंस्वरश्चनद्याक्रोशंतमलंघित
वान् कुवलयापाडंक्रोशंतंमारयित्वारंगंप्रायेत्यर्थः २१ श्रीरामजयरामजयजयरामश्रीरामश्रीकृष्ण

अथरामस्यपुनःजानकींप्रतिनिर्वेदोक्तिमाह भोजानकी अविदाअविद्या अज्ञानेनमयासहपंचवटीन
र्मनरोचतेवायनसंगतासीसर्थः अथतदेवाज्ञानंप्रकटयन्नाह शवेशवद्रिये तक्ससेचित्रकुरंगमा
लस्यास्तीतिमायाम्रगमजानतेसर्थः २२ श्रीरामजयरामजयजयरामश्रीकृष्णजयकृष्णजयकृष्ण

रामेविदाचित्रकुरंगमालापंचावटीनर्मनरोचतेवा
वालेचवैरेनिर्मिनरावचापंलामागरंकुत्रविदाविशेषः २२

आकृष्णपक्षेतु कृष्णस्यसामर्थ्यंकंसहननासूर्वमेतनुप्रकटीभूतमित्याह यःवालेवाल्यास्त्रूपेदैसतृणाव
र्तेआम्वरःआम्वलोभूतू तथालामागरंकुत्राचितू अविवेशपूतनालस्याः गरंविषनर्मक्रीडामात्रमिव १२
कुत्राचिदाविशेवेश अनेनबाल्ये एतावतंपुरुषार्थंकृतवान्तूकिंपुनर्यौवनेइतिसूचितं एवंभेराः
स्ऽः दुभयंसहयनमाह नरीचापमाह नरीचापमिवनरीनर्तकीचापंनृपुंगमात्रंदर्शयंतितलक्षिरिसर्थः २२

अथजानकीनिर्वेदोक्तमाह स्कंधेगृहीत्वासत्वरंनिर्गतस्यरावणस्यमार्गेजटायुनासाकंसयोगोभूदितिरथो
पलतयाह जटायुषोरावणंप्रतिवदतिभोस्वमरामत्तइयंमालिनांदूयतेस्वमंतंस्वीगृहस्तेनमलःउन्मत्तस्व
मेवात्महंकरोषि परकार्यंविचारंनमन्यणोषि असावधानत्वादिसर्थः मलनी अलिस्कुमाराजानकीदूयतेक्ले
शंप्राप्नोतिकिंभूतापक्षिकंधारापक्षिणीस्वपक्षणातिनिमयिकंधरामन्यायस्याःसातांइतमत्संग्रानेनेक्षि
पसिवानमुंचासिवालर्हिसंग्रामेणमोस्वयिष्यामीतितात्पर्यार्थः २३ श्रीरामजयरामजयजयरामइति

नेहवाक्षिपसिपक्षिकंधरामालिनीस्वमत्तमलदूते तेयदूतमतमस्वनीलिमाराधकंक्षिपसिपक्षिवाहने २३

कृष्णपक्षेतु कंसवधेकृतेउधवाक्रूरादयःकृष्णस्तुवंति भोयदूत्तमस्वनीलिमाराधकंपुरुषंतपेक्षिवाहनेक्षि
पसि युदुधुउत्त मश्रेष्ठतमस्वनीलिमानमेवमाधयतीतिनिलीमाराधकःमेघेन्द्रनीलादिषुनीलत्वमवलो
कयतरनुस्मतिकुर्वाणंपुरुषंतेपक्षिवाहरानंगरुडस्तंस्मरनूक्षिपसिआरोपयंहयसितगरुडरूढंकृत्वावै
कुंठंप्रतिनयसीसर्थःएवंपरोक्षभावनयायतन्मनःकंसस्यश्रीमत्साक्षात्कारोवतःतस्यभुक्तिरिस
त्रकिंचित्रमिसर्थः २३ श्रीगजाननश्रीरामजयरामजयजयराम श्रीकृष्णजयकृष्णजयकृष्णजयइति

ततोजटासुरवदनाज्जानकीमुक्लिवान्दक्षिणतश्चलितस्य रामस्यावस्थामाह सरामश्चयोषाम ते वनांतया
नस्वणुवेदनासुखारण्यताविरोधी अभूत् योषां जानकीं विना वनांतेषु मानं परिभ्रमणं महत्क्लेशं प्राप्तवान्
पिसुतरां अणुवेदनां सुविवेकेन लक्ष्मणं कृतसांत्वन इषत्क्लेशोऽभूत् जातेषु सत्सु अरण्यगता वानराः अविरोधि
नो मित्राणि यस्य स तथा स्त्रीविरहवेदनासङ्कुलासु वानरैः सह सख्यं जातं तेन विश्रांतिरभूदित्यर्थः २४

वनांतयानस्वणुवेद्यासुयोषाम तेरण्यगतविरोधी धीरोविताभण्यरतेभ्रमायोसुनादवेणुस्वनयातनावः २४

श्रीकृष्णपक्षे तु कृष्णो गोकुलं विहाय मथुरां गते सति विरहाखिन्ना राधा वा मिथः प्रोचुरित्याह भो गोप्यः अग
ण्यरलधीनो वः अविता इति मघागणायितुं योग्या अयोग्यं अगण्यं अस्माच्चैं कुलायारतं तत्र धीरो निर्लज्ज
त्वेन प्ररक्तः कृष्णः नः अविता पुनर्गोकुलमागमनं रक्षयतीति भ्रमा असमं ततः कुतः सुतनां दूराद्वेणुस्व
नामकर्ण्य यावत्क्लत्यं दर्शनं तावत्पर्यातं यायात् तेनाविरहदुःखमस्माकं पुनस्तस्मिन्परदेशगते सोलकिं १२
न्नस्मरसीत्यर्थः २४ श्रीरामजयरामश्री

अथ पूर्वश्लोके तु अणुवेदना स्थितिपदेन महति दुःखे सति कथमणवी दिनेषु तत आह पंपातोयरसान्नः
किंनु तोयेवसः स्वादुता यस्याः सा तोयरसा एवंविधा यं पापा किंनास्ति अस्ति एवमुभयथा रामस्य विश्रांति
विरहदुःखेप्यासीदित्यर्थः २५ श्रीरामजयरामजयजयराम इति श्रीरामनाम श्रीराम श्रीरामश्री

किंनु तोयरसा पंपा न सेवा नियतेन वै वैनतेयनिवासेन पापं सारयतो नु किं २५

अथ कृष्णपक्षे तु गोप्यः किंनु वैनतेयनिवासेन कृष्णेन सारयतः अस्मान्पापयतस्त्वं पापं नु किं किंनु
वाच्यमित्याध्याहारः कृष्णोपासनया निःपापास्त्वं कथं स्मर त्वं तारयसीति सूचितं २५ श्रीरामश्रीकृष्ण

अथवालिनाहृतदारः सुग्रीवः रामं शरणं प्रयातइत्याह सहि इति सनतातपहा रामः तेनस्वंत्रोननतस्यन
न्नस्यत्राणंगतस्य आतपंसंतापंहंतीतितथाविधोरामः त्रोनसुखेनस्वंतेनेअश्वासनूआजनितसुखे
नस्वंसुग्रीवंतेनेविस्तारितवान् नविहितःसंपादितःआगःअपराधोयेनसतथागिरपराधिन्हेपिकृतार्थमि
सर्थः २६

सनतातपहातेनेस्वंत्रोनाविहितागसं संगताद्दिविनाशेस्वंतेनेहापततानसं २६

कृष्णपक्षेतु उद्धवः गोपिकाः प्रतिकृष्णस्याश्रितपक्षपातंवदति सनेतानियताकृष्णः सहसरस्वतीतीर
संस्थनंदनिकटेप्रायतथासंगताहिविना त्रोस्वंजनंतातनसंगतः प्राज्ञोयोहिः सर्पः तस्यविनाशेकृतेस १४
तिस्वंस्वकीयंजनंगोकुलस्थितंततानविस्तारयामास नंदनिधनशंकयासुमर्षुविस्तारितवानूसकिं
स्ववतिउपेक्षितइतिसर्वितं २६

नूविरता
अथवालिनंहत्वासुग्रीवपत्नीममोन्वपदिसाह सरामः अनुविष्यतिति कपितालविभागेनयेपांसुग्रीवपत्नीद
त्तवान् २७ श्रीरामजयरामजयजयरामश्री कृश्रीरामजयरा जयजयरामश्री कृष्णजमक्तसजयतत्वष्ण

कपितालविभागेनयोषादोनुनयेनसः सनयेननुदोषायोनगेभाविलतापिकः २७

कृष्णपक्षेतु गोपिकांवदतिसकृष्णः नमोयेननीतिमार्गेणास्ति नुइतिवितर्केदोषायोक्तिदोषाणांदुःखानां
आयः प्राप्तिर्यस्मात्सनतथापुनरायास्पतीतिस्वेतून नगेभाविलतापिकः नगेपर्वतेभाविनीयालतावली
सहकारिशास्वावातत्रापितुल्योयथासमसंभावितार्थः तथातद्दिदिसर्थः २७ श्रीरामश्रीकृष्णइति

अथांगदोरामंप्रतिवदतिभोराम तेसभाग्रकंपिवर्णमालिकास्तिप्रकृष्टायेवानराः तेषांयेविचित्रवर्णास्ते
षांमाठयस्यांसातथाविद्यावानूरश्रेणीसंपन्नासातुनअल्पकभ्रमरंयथानल्पकासंख्यापरंतुअभ्रक
ल्पितानास्तिअन्नेआकाशेमेघमंडलपर्यंतंवानराः सन्तिअन्येवानरपंक्तिस्तुआकाशेकल्पितास्तीत्यर्थः २८

तेसभाग्रकपिवर्णमालिकानाल्पकभ्रमरमभ्रकल्पिता नाल्पिकभ्रमरसभ्रकल्पनाकालिमार्णवपिकभ्रमासते २८

कृष्णपक्षेतु गोपिकाप्रस्तावव्यपदेशेनपिकंप्रतिवदति भोकालिमार्णवपिककालिमासमुद्रकोकिलत्वयि
नाल्पिकाभ्रमरसकल्पनाभास्मते तत्वेभवंताल्पिकं सुरतंतस्यभ्रमस्तत्रप्रकल्पनाभासतेस्वात्मसुर १५
तप्रमेयवान्रसः सएवप्रभासतेनसाक्षात् अस्मत्सुरत तदतिथंगत्वमपिदुर्लभमित्याहुर्थः २८ श्री
२६

अथरावणेयद्यपिसकलसैन्यसन्नाहवान्नस्तितथापितस्मिन्नूर्विरलक्षणंनास्तीत्याह अक्रमातुरंयथास्त
नितथारावणेअक्षिपतत्रपाननेसतिअल्पकभ्रमणंनभविष्यतिनक्रमः परस्त्रीहरणादिकस्तेनआतुरं
स्यात्तथाअक्षिपतनंरामस्यदृष्टियातस्तेनयात्रपांतत्वांतयातरावणेनम्रेसतिपतिपर्याकुलतयाअल्प
कंअल्पभ्रमणंचित्तभ्रमः नभविष्यतिकिंतुभ्रयातूचित्तभ्रमोभविष्यतीतिअहोवरित्रतमतिक्रम्यपापं
कृतवतोममजयोनास्तीत्येवलज्जयाकृहाचित्तस्यैकतावस्थानंनभविष्यतीत्यर्थः २९

रावणेक्षिपतनत्रपानतेनत्पकभ्रमणमक्रमातुरः रंतुमाक्रमणमभ्रकल्पनातेनपात्रनतपक्षिणेवरा २९

कृष्णपक्षेतु उद्धवः गोपिकाः प्रतिवदतिभोगोप्यः तेनाक्रमणंदेश्यनिर्वहणादिकं तथाकाअभ्रकल्पनातवरं
तुंकीडामवलंबितंतस्यानेननकिमपिप्रयोजनंतेनकारणेनसामेयस्यामतापात्रनमपक्षिणेवरायात्रेनताः
पात्रनताः पुरुषाः तेषांपक्षोयस्यसतथापक्षीतस्मैकृष्णापवराकल्पितास्मकानांध्यानगोचरत्वायेत्यर्थः त
आभवतिध्यानयोगेनैवक्तार्थत्वंजालमस्तीतिसूचितम् २९ श्रीरामजयरामजयजयरामश्रीकृष्णइति

अथसीताशुध्यर्थंआदिष्टोहनूमान्रामंप्रतिविद्युन्मालयाह अयेश्रीरामलंकायानेलंकांप्रतिगमनेशंका
प्राप्तोकोपिविघ्नवारोनास्तीत्यर्थः यतोदैवेयगेममरोवादानंजातमस्ति वदसंबंधीदैवः तस्मिन्दैवेयागे
सेवालंबिष्ठास्ति अतोलंकागमनेनैवसेवयाएवसामर्थ्यइत्यर्थः ३० श्रीरामजयरामजयजयरामरति

दैवेयगेसेवादानंशंकायानेलंकायाने नेयाकालंतेयाकाशंनंदावासेगेयोवेदैः ३०

कृष्णपक्षेतु पुनरुद्धवः कृष्णंस्तौति वेदैर्गेयः सः कृष्णः नंदावासेनंदव्रजेभूत् सकः यः नेयाकालंतेयाका
शंनेतुंसंहर्तुंयोग्योनेयः सह तथासमंताकालेयेमसहएवंविधामाकाशंकालाशादिकमपिहर्तुंक्षमः १६
तत्रभवतीनस्तिसंसारस्त्रमः क्रियानित्यर्थः ३० श्रीरामजयरामजयजयरामश्रीकृष्णजयकृष्णइति

अथजानकीशुद्धिंकृत्वायनागतोहनूमान्रामंप्रतिवदति [illegible]समाक्षस्याज्ञान्याह साजानकीउग्रमतिक्लेशंप्र
थाभावलितत्यानच्यांकुल्यायामुद्यानेनेयाउद्यानेक्रीडावनेनेतुंयोग्यानियातथावसीलाकृत्रिमसरिद्वयकंठे
उद्यानेस्तीस्फत्तंतृथरावणस्यक्रीडावनंगतुंकथमकाशलब्धवान्मिसाह यानेप्रयाणकालेअनुज्ञाजंबुकावनपा
लादिकृततद्भयमपिनिराकृतवानित्यर्थः ३१

शंकावज्ञानुन्नुत्तावकाशंयानेनद्यामगमुद्याननेया यानेननद्यामुग्रमुद्याननेयाशंकावज्ञानुत्तनुत्तावकाशं ३१

कृष्णपक्षेतु गोकुलागतउद्धवः कृष्णंप्रतिवदति भोकृष्णउद्यानेनेयाकापिगोपिवद्यांयाताननेक्षतीतित्वया
पूर्वस्कंधोपरिस्थितोद्यानंयाप्राप्तिलासायमुनोपकंठेउगंअतिनिकटंयभास्यात्तथायानेलोकानामागमनेसिधा
स्तिनुतर्हितस्यादयितदेवरादयः किंन्नसंतीसाह तुअहंपुनरागमिष्यामीतिमदनुत्त्स्यालब्धावकाशंयभा
स्यात्तथादपिलदेवरादीनांशंकाभयंन कृतवंतिकृत्यधिविगणय्यप्राणावरोधादिनिसृति एवंतथैकयातथा
अन्याअपिसर्वाबोधिताइत्युक्तंभवति ३१

अथसमुद्रंनियम्यलंकांगंतुंशक्तोपिरामःक्षुद्रवानरकौतुकंद्रष्टुंसेतुबंधनार्थं आदिदेशेत्याह वाइत्यथवससरा
मःयंकंचित्तुवानरंपाथोपनसेतवेदिदेशपाथसांउदकानांअयनयस्मिन्सपाथोयनःसमुद्रःतस्यसेतवे
सेतुबंधायदिदेश आज्ञापयामासपरंद्वितीसीतायांयथाभवतितथा द्वयोःसमाहारोद्वितीयलस्यआयः
प्राप्तिःकिंपुनरेकांसीतांलब्ध्वासीताद्वयलाभोभवतीतिउत्साहेन आदिदेशइत्यर्थः ३२

वाऽदिदेशोद्विसीतायंपाथोयनसेतवे वेलसेनयथोपायंतासीद्विशदेदिवा ३२ श्रीरामजयराम

कृष्णपक्षेतु कंसेहतेमातामहोग्रसेनायराज्यंदत्वास्वयंतत्सैन्यपतिर्बभूवेत्याह सकृष्णःयथोपायंवे
लसेनयंतासीत् उपायंराजनीतिमनतिक्रम्यवेलसेनवेत्रधारणाकरसेनयंतानियंतासीत् विशदे १७
दिवविशदेसुमुहूर्तदिवसेलक्षिते ३२ श्रीराम[illegible]रामजयराम रामश्रीकृष्णजयकृष्णजयकृष्ण

अथराक्षसैःसहसंग्रामोपस्थितौश्रीरामोहनूमन्तमुवाच [illegible] युष्माकंमध्ये अरवितःअह्निवासंग्रामेवायुजो
हनूमान्नरवीर्यस्यतदरवितस्मिन्त्रात्राविसर्थः तथाआह्निदिवावासंग्रामेउपस्थितेहनूमानेवसंपलः रात्रौदिवावा
मायाविद्भिःसहसंग्रामेवायुपुत्रएवनिर्वहिष्यतीत्यर्थः भवति ३३

वायुजोमनुतेनेमेसंग्रामेरवितोनुवः वन्हितोविरमेग्रासंमेनेतोमनुजोसवा ३३

श्रीकृष्णपक्षेतु कंसादिहननेराज्यस्थानेवाकश्चित्किंचित्तत्रवर्णनीयमित्याह नःविरमेप्राप्तेसतिवन्हितःग्रासंमे
नेअतःअमनुजःदेवःसन्युनापराक्रमितत्राकिमपिचित्रमित्यर्थः ३३ श्रीरामजयरामजयरामश्रीकृष्ण

यु अथरामरावणयोर्युद्धप्रसंगेवानरैःर्व्याकुलीकृतोरावणःरामेणसहयोद्धुंनप्राभूतावमगादित्याह यत्राकानुगानन्य
स्यैवयोजनानितत्रइतासुःस्थोक्षितायमाअंकंअनुगच्छंतितेअंकानुगाःन्नारणगतौवानरास्तेषुअनन्यवयोजन्म
येषांतेनन्यवयसःसुग्रीवहनुमंदादयस्तेषांअयनानिसंग्रामव्यूहप्रवेशपरिसरणानियस्वलत्रइतासुःदशास्यः
स्योःरामचंद्रस्यक्षतायशस्यैस्त्रघातायमानसमथोभूत्प्रथमतोवानरैरेवव्याकुलीकृतःसन्नामेणासहयोद्धु
मवलब्धनकाशोभूदितिसार्थः ३४

क्षतायमायत्रराघोरितासुरंकानुगानन्यवयोदयोनि निनाययोवन्यनगानुकारंसुतारिष्वोत्रयमायताक्षः ३४

श्रीकृष्णपक्षेतु पूर्वंवृंदावनादिक्रीडावनेषुकृष्णोदेसानवधीसंकक्तंलत्रयत्रमतिभयानकंहतमित्याह यःआयताक्षः
कृष्णःफतास्त्रियोत्तरत्रयंनिनायसुलाःयोगात्प्राप्तात्रवलेअपरश्चलेषुघोरत्रयंभयानकत्रयंनिनायप्रापितवान्पू
तनाअसुरःकेशीचेतिभयानकत्रयंस्वांतिकेप्रापितइत्सर्थः अथभयानकत्वमेवव्यनक्ति किंभूतंघोरत्रयंयो १८
वनन्यगानुकारंवनेभवानन्याःदेसाव्याघ्रादयोवातेषुनग[illegible]वन्तु अनुकारोयस्यसतथा अतिनम्रचंडर
सर्थः [illegible]

अथसपरिवारस्यतारकब्रह्मणिसमावेशोभूदित्याह [illegible]नकेअपरिपुःरावणःश्रीस्त्वाश्रीमोक्षि
लक्ष्मीःतस्यानकृदीप्तिःप्रकाशस्तेनेत्यर्थः किंभूतःदाससुतान्वितःदासाःकुंभकर्णादयःसुताइंद्रजितादयः
तेसर्वेतारकंप्राप्तइत्यर्थः ३९ श्रीरामजयरामजयजयरामश्रीकृष्णजयकृष्णजयजयकृष्णश्रीरामः

तारकेरिपुरायश्रीस्त्वादासस्सुतान्वितः तन्वितासुसदावात्श्रीपरापुरिकेरता ३९

श्रीकृष्णपक्षेतु सदावानयथास्यात्तथान्वितासुश्रीपरापुरिकोरतासीत्तनुनाशरीरेणइतासुप्राप्तासुगोपि
कासुश्रियःपराश्रीपराद्वितीयलक्ष्मीरिवसेरंध्रीपुरिमथुरायांकिंपरब्रह्मणिकृष्णेरतासीत् गोकुलेकृष्णवि
सु रहेणतप्तचितांगोपिकासुमथुरायांकृष्णस्यसैरंध्र्यासाकंगार्हस्थ्यमभूदित्यर्थः ३९ श्रीरामजयरामइति

अथरावणेसपरिवारेहृतेसतिलंकाहृतत्रभाभूदितिविद्युन्मालयाहृ यानेपराधगमनेसतिलंकारंकागारा
ध्यासंयथाभवतितथामेयाभूत् लंकानगरीरंकस्यागारं तस्याध्यासोभ्रमः तेनमातुंज्ञातुंयोग्याभूत् इयंलं
काउतरंकस्यापिलुरंकस्यागारंइतिभ्रमेणज्ञानाभूदित्यर्थः कस्मिन्सतिकाराध्यासेसतिकारावादीगेहृंतस्याध्यासे
विस्तारेसतिकारावित्वात्निर्निवंदीकृतेषुदेवेषुनर्मोचितेष्वसत्स्वित्यर्थः ३६

लंकारंकागाराध्यासंयानेमेयाकाराध्यासे सेव्याराकायामेनेयासंध्यारागाकारंकालं ३६

कृष्णपक्षेतु पूर्वंसैरंध्यासाकंकृष्णास्यगार्हस्थ्यमभूदित्युक्त्वातत्रदृष्टांतमाहृ सेव्यासेवितुंयोग्याअतिर
मणीयासैरंध्रीयामेसंज्ञकावसरेकालंमेघश्यामंकृष्णंप्रतिनेयाभूत् नेतुंयोग्याभूत् अत्रयोग्यदेनोभयोः
शोभातिशयःसूचितः काकमिव राकासंध्यारागाकारमि[illegible] वंद्रोदयोपलक्षितोराकासंध्यारागाकारंप्रा
प्ययथाशोभाभवतितथातिशयशालिनीभवतितद्वि[illegible]६

१९

गोदावरीब्रह्मगिरेःसकाशात्संप्राप्तितायागुरुर्षिप्रयागा[illegible]गासोपिपुनः भ्रमेतिमानेतुमंद्रिप्राभव
कृमेतां १ एवंविलोमाक्षरकाव्यकर्तुर्भूयांसमायासमवेक्ष्यत[illegible] जानंविमात्रिकविवसीमांदेवज्ञस्
र्याख्यसंप्रतिष्ठां २ इतिश्रीमद्दैवज्ञपंडितसूर्यविरचितंरामकृष्णकाव्यटिप्पणंसमाप्तंश्रीरस्तु छ
श्रीशके१६८२विक्रमनामसंवत्सरेआश्विनसमासेशुक्लपक्षेएकादश्यांभौमवासरेतद्दिनीरामकृष्णकाव्यस छ छ
माप्तमस्तु छ छ छ छ छ छ छ

श्रीरामजयरामजयजयराम श्रीकृष्णजयकृष्णजयजयकृष्ण श्रीरामजयरामश्रीरामजयरामजयराम

अथरामकृष्णकाव्यसमाप्तः श्रीरामचंद्र